# ૭. ચોવીશ જિન સ્તોત્ર

(અનુષ્ટુપ વૃત્ત)

આદૌ નેમિ જિનં નૌમિ, સંભવં સુવિધિં તથા;
ધર્મનાથં મહાદેવં, શાંતિ શાંતિકરં સદા. ૧

અનંતં સુવ્રતં ભક્ત્યા, નમિનાથં જિનોત્તમમ્;
અજિતં જિતકન્દર્પં, ચન્દ્રં ચન્દ્રસમ પ્રભમ. ૨

આદિનાથં તથા દેવં સુપાર્શ્વં વિમલં જિનમ;
મલ્લિનાથં ગુણોપેતં, ધનુષાં પંચવિંશતિમ. ૩

અરનાથં મહાવીરં, સુમતિં ચ જગદ્‌ગુરુમ;
શ્રી પદ્મપ્રભનામાનં, વાસુપૂજ્યં સુરનંતમ. ૪

શીતલં શીતલં લોકે, શ્રેયાંસં શ્રેયસે સદા;
કુંથુનાથં ચ વામેયં, વિશ્વાભિનંદનં વિભુમ. ૫

જિનાનાં નામભિર્બદ્ધૈઃ, પંચપષ્ટિ સમુદ્ભવૈઃ;
યંત્રોડયં રાજતે યત્ર, તત્ર સૌખ્યં નિરંતરમ્. ૬

યસ્મિન્ ગૃહે મહાભક્ત્યા, યંત્રોડયં પૂજ્યતે બુધૈઃ;
ભૂતપ્રેત–પિશાચાદે–ર્ભયં તત્ર ન વિદ્યતે.
સકલગુણ નિધાનં યંત્ર–મેનં વિશુદ્ધં;
હૃદયકલમકોષે ધીમતાં ધ્યેય રૂપમ; ૭

જય તિલકગુરોઃ શ્રી સુરિરાજસ્ય શિષ્યો,
વદતિ સુખનિધાનં મોક્ષલક્ષ્મી નિવાસમ. ૮